# Devaih Kritam Shri Krishnasya Dvichatvarimshannama Stotram

# देवैः कृतं श्रीकृष्णस्य द्विचत्वारिंशन्नामस्तोत्रम्

## Document Information

Text title : Devaih Kritam Shri Krishnasya Dvichatvarimshannama Stotram

File name : devaiHkRRitaMshrIkRRiShNasyadvichatvAriMshannAmastotram.itx

Category : vishhnu, vishnu, krishna, brahmavaivartapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | shrIkRRiShNajanma, pUrvabhAga | adhyAya 7/55-59||

Latest update : March 22, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2025

*sanskritdocuments.org*

# देवैः कृतं श्रीकृष्णस्य द्विचत्वारिंशन्नामस्तोत्रम्

देवा ऊचुः ।
जगद्योनिरयोनिस्त्वमनन्तोऽव्यय एव च ।
ज्योतिःस्वरूपो ह्यनघः सगुणो निर्गुणो महान् ॥ ५४॥

भक्तानुरोधात्साकारो निराकारो निरङ्कुशः ।
निर्व्यूहो निखिलाधारो निःशङ्को निरुपद्रवः ॥ ५५॥

निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः ।
स्वात्मारामः पूर्णकामोऽनिमिषो नित्य एव च ॥ ५६॥

स्वेच्छामयः सर्वहेतुः सर्वः सर्वगुणाश्रयः ।
सुखदो दुःखदो दुर्गो दुर्जनान्तक एव च ॥ ५७॥

सुभगो दुर्भगो वाग्मी दुराराध्यो दुरत्ययः ।
वेदहेतुश्च वेदाश्च वेदाङ्गो वेदविद्विभुः ॥ ५८॥

इत्येवमुक्त्वा देवाश्च प्रणेमुश्च मुहुर्मुहुः ।
हर्षाश्रुलोचनाः सर्वे ववृषुः कुसुमानि च ॥ ५९॥

द्विचत्वारिंशन्नामानि प्रातरुत्थाय यः पठेत् ।
दृढां भक्तिं हरेर्दास्यं लभते वाञ्छितं फलम् ॥ ७.६०॥

इति श्रीब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे पूर्वे
सप्तमाध्यायान्तर्गतं देवैः कृतं श्रीकृष्णस्य
दविचत्वारिंशन्नामस्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । श्रीकृष्णजन्म, पूर्वभाग । अध्याय ७/५५-५९॥

brahmavaivartapurANa . shrIkRRiShNajanma, pUrvabhAga . adhyAya 7/55-59..

Proofread by PSA Easwaran

*Devaih Kritam Shri Krishnasya Dvichatvarimshannama Stotram*

pdf was typeset on March 22, 2025

Please send corrections to *sanskrit@cheerful.com*